# अथ सिद्धकुंजिकास्तोत्रम्

शिव उवाच :-

श्रृणु देवि प्रवक्ष्यामि कुंजिकास्तोत्रमुत्तमं।
येन मंत्रप्रभावेण चण्डीजाप: शुभो भवेत्।१।

न कवचं नार्गलास्तोत्रं कीलकं न रहस्यकं।
न सूक्तं नापि ध्यानं च न न्यासो न च वार्चचनं।२।

कुंजिकापाठमात्रेण दुर्गापाठफलं लभेत्।
अति गुह्यतरं देवि देवानामपि दुर्लभमं।३।

गोपनीयं प्रयत्नेन स्वयोनिरिव पार्वति।
मारणं मोहनं वश्यं स्तम्भनोच्चाटनादिकं।
पाठमात्रेण संसिद्धयेत् कुंजिकास्तोत्रमुत्तमम्।४।

अथ मन्त्र:

ऊँ ऐं ह्रीं क्लीं चामुण्डायै विच्चे।
ऊँ ग्लौं हुं क्लीं जूं स: ज्वालय ज्वालय ज्वल ज्वल प्रज्वल प्रज्वल
ऐं ह्रीं क्लीं चामुण्डायै विच्चे। ज्वल हं सं लं क्षं फट् स्वाहा।

नमस्ते रुद्ररूपिण्यै नमस्ते मधुमर्दिनि ।
नम: कैटभहारिण्यै नमस्ते महिषार्दिनि।१।

नमस्ते शुम्भहन्त्र्यै च निशुम्भासुरघातिनि ।
जाग्रतं हि महादेवि जपं सिद्धं कुरुष्व मे।२।

ऐंकारी सृष्टिरूपायै ह्रींकारी प्रतिपालिका।
क्लींकारी कामरूपिण्यै बीजरूपे नमोऽस्तुते।३।

चामुण्डा चण्डघाती च यैकारी वरदायिनी।
विच्चे चाभयदा नित्यं नमस्ते मन्त्ररूपिणी।४।

धां धीं धूं धूर्जटे: पत्नी वां वीं वूं वागधीश्वरी।
क्रां क्रीं क्रूं कालिका देवि शां शीं शूं मे शुभं कुरु।५।

हुं हुं हुंकाररूपिण्यै जं जं जं जम्भनादिनी ।
भ्रां भ्रीं भ्रूं भैरवी भद्रे भवान्यै ते नमो नम:।६।

अं कं चं टं तं पं यं शं वीं दुं ऐं वीं हं क्षं।
धिजाग्रंधिजाग्रं त्रोटयत्रोटय दीप्तं कुरुकुरु स्वाहा।७।

पां पीं पूं पार्वती पूर्णा खां खीं खूं खेचरी तथा।
सां सीं सूं सप्तशतीदेव्या मंत्रसिद्धिं कुरुष्व मे।८।

इदं तु कुंजिकास्तोत्रं मंत्रजागर्तिहितवे।
अभक्ते नैव दातव्यं गोपितं रक्ष पार्वति।९।

यस्तु कुंजिकया देवि हीनां सप्तशतीं पठेत्।
न तस्य जायते सिद्धिररण्ये रोदनं यथा।१०।

।। ऊँ श्री दुर्गादिव्यर्पणमस्तु।।

Created by demo-version of Universal Document Converter. Full version doesn't add this stamp.
WWW.PRINT-DRIVER.COM

Created by demo-version of Universal Document Converter. Full version doesn't add this stamp.
WWW.PRINT-DRIVER.COM